इ अन्तिके" "कुलायकूलेषु विलुठ्य ते हुताः" नैष०। "कूलाय कूलेषु नीडान्तिकेषु" मल्लि०। बलादि० अस्त्यर्थे वा मतुप् मस्य वः। कूलवत् पक्षे इनिः कूलिन्। तद्युक्ते त्रि० स्त्रियां ङीप्। ततः भूमा० सौवीरे सम्बन्धिन्यर्थे वुञ्। कौलक कूलसम्बन्धिनि सौवीरे त्रि०। [२स्तूपे मेदि०।

**कूलक** न० कूल+ण्वुल्। १तीरे विश्वः। कूल+स्वार्थे क।

**कूलङ्कष** त्रि० कूलं कषति व्याप्नोति कष—खश् मुम् च। कूलव्यापके। "कूलङ्कषौघाः सरितस्तथाऽपराः" माघः। "कूलङ्कषेव सिन्धुः प्रसन्नमम्भस्तटतरुञ्च" शकुन्तला।

**कूलवती** स्त्री कूल+अस्त्यर्थे बलादि० मतुप् मस्य वः। ङीप्। नद्यां राजनि०।

**कूलचर** त्रि० कूले नदीकूले चरति चर—ट। गजादिजन्तुषु। कूलचराश्च जन्तवः समांसगुणाः सुश्रुते दर्शिता यथा "तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोन्द्रन्यङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः। वातपित्तहरा वृष्या मधुरा रसपाकयोः। शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः"।

**कूलन्धय** त्रि० कूलं धयति धे—खश् मुम् च मुग्धबो०। कूलस्पर्शिनि वनादौ स्त्रियां ङीप्।

**कूलभू** स्त्री ६त०। तीरभूमौ हेमच०। कूलभूमितीरभूम्यादयोऽपि "कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्टः। (वायुः) उद्भटः।

**कूलमुद्रुज** त्रि० कूलमुद्रुजति उद्+रुज खश् मुम् च। कूलभेदके। "आसादितौ कथं बूतं न गजैः कूलमुद्रुजैः" भट्टिः। "मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः" रघुः

**कूलमुद्वह** त्रि० कूलमापूर्य्य वहति उद्+वह—खश् मुम् च। कूलमापूर्य्य वाहिनद्यादौ "उत्तीर्णौ वा कथं भीमाः सरितः कूलमुद्वहाः" भट्टिः।

**कूलहु(ह)ण्डक** पु० कूले हुण्डते संघीभवति हुडि—संघे ण्वुल् पृषो० वा उलोपः। जलावर्त्ते त्रिका०

**कूलास** त्रि० कूलमस्यति क्षिपति अस—अण्। कूलक्षेपके ततः सङ्कला० चतुरर्थ्याम् अण्। कौलास तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप्।

**कूलेचर** त्रि० कूले चरति चर अलुक्स०। नद्यादेस्तीरचरेषु महिषादिपशुषु। ते च "चमरीवारणादयः। एते कूलेचराः प्रोक्ताः यतः कूले चरन्त्यपाम्" भावप्र० उक्ताः आदिपदात् कूलचरशब्दे सुश्रुतेनोक्ता ग्राह्याः। "कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः। मधुराः शीतला: स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाः" तद्गुणा स्तत्रोक्ताः।

**कूल्य** त्रि० कूले भवः यत्। १तीरभवे २रुद्रभेदे पु० "नमस्तीर्थ्याय च कूल्याय च" यजु० १६,४२, रुद्राध्यायः।

**कूवर** पु० कू—शब्दे कुटादि—वरच्। १कुब्जके वृक्षभेदे (कुंजा) २कुब्जे त्रि० ३मनोहरे त्रि० शब्दचि०४युगन्धरे यत्र युगकाष्ठमासज्यते तत्र रथावयवभेदे पुंन० अमरः "वैदूर्य्यरुक्मिकूवरम्" रामा०। "रथं चामितकूवरम्" भा० आनु० ४२६८श्लो०। "पादैः पुरः कूवरिणां विदारिताः" माघः। ५रथिकस्थाने गोयुक्तं रथमुपक्रम्य "पश्चात् कूवरवाक्षुरावभिन्द्येत्" गोभि०सू०। कूवरं रथिकस्थानम्" सं० त० रघुनन्दनः।

६कम्बलाच्छादितरथे स्त्री ह्ला० गौरा० ङीष्।

**कूवार** पु० कुं तीरभूमिं वृणोति वृ—अण् उप०स० पृषो० दीर्घः। कूपारशब्दार्थे अमरटीका

**कूश्म** पु० हवनीयदेवभेदे। "प्रदरान् पायुना कूश्मांश्छकपिण्डैः" यजु० २५.७ "कूश्मान् देवान् प्रीणयामि" वेददी०।

**कूष्माण्ड** पु० ईषदुष्मा अण्डेषु वीजेष्वस्य। १कुष्माण्डशब्दार्थे २शिवपारिषदभेदे हेमच० "अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः" भाग०२,६,४५।३कृषिभेदे पु० "कूष्माण्डोराजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः" याज्ञ०। तद्वृत्तत्वात् "यद्देवा देवहेडनमित्याद्यासु ४ऋक्षु स्त्री ङीप् "त्रिरात्रोपोषितोभूत्वा कूष्माण्डीभिर्घृतं शुचिः। सुरापः स्वर्णहारी च रुद्रजापी जलेस्थितः" याज्ञ०स्मृ०। "त्रिरात्रमुपोषितः कूष्माण्डीभिर्यद्देवादेवहेडनमित्याद्याभिः कूष्माण्डदृष्टाभिरनुष्टुब्भिर्मन्त्रलिङ्गदेवताभिर्ऋग्भिश्चत्वारिंशद्व्रताक्वतीर्हुत्वा शुचिर्भवेत्। तथा बौधायनेनाप्युक्तम् "अथ कूष्माण्डीभिर्जुहुयाद्योऽपूतमिवात्मानं मन्येत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते अयोनौ वा रेतः सिक्त्वा अन्यत्र स्वप्नादिति"। मिता० "सर्ववेदपवित्राणि वक्ष्याम्यहमतः परम्। येषाञ्जपैश्च होमैश्च पूयन्ते नात्र संशयः। अघमर्षणन्देवकृतः शुद्धवत्यस्तरत्समाः। कूष्माण्ड्यः पावमान्यश्च दुर्गासावित्र्यथैव च" मिताक्षरायां वशिष्ठस्मृ०। स्वार्थे क। तत्रार्थे

**कूष्माण्डवटिका** स्त्री कुष्माण्डखण्डमिश्रिता माषादि वटिका शा०त०। (कुमडावडी)ख्याते पदार्थे "कूष्माण्डवटिका ज्ञेया पूर्व्वोक्तवटिकागुणा। विशेषात् रक्तपित्तघ्नी लघ्वी च कथिता बुधैः" भावप्र०। पूर्व्वोक्तवटिका माषवटिका।

**कूष्माण्डी** स्त्री ईषदुष्माऽण्डेषु यस्याः गौरा० ङीष्। १ओष-